International Journal of Sanskrit Research 2022; 8(2): 100-104

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(2): 100-104
© 2022 IJSR
www.anantaajournal.com
Received: 03-12-2021
Accepted: 12-01-2022

**मैत्रेयी न्यूनहा**
शोधछत्रा संस्कृतविभागः, हैदराबाद,
तेलंगाना, भारत

**Corresponding Author:**
**मैत्रेयी न्यूनहा**
शोधछत्रा संस्कृतविभागः, हैदराबाद,
तेलंगाना, भारत

# संस्कृतसाहित्ये राष्ट्रभक्तिः

**मैत्रेयी न्यूनहा**

## प्रस्तावना

अस्माकं वैदिकसंस्कृते: प्रभृति वर्तमानायाः लौकिकसंस्कृते: आधुनिकग्रन्थानां पर्यन्तं यत् - यत् मनीषिभिरुक्तं तत्सर्वं राष्ट्रोत्थानार्थं राष्ट्रस्य उन्नत्यर्थम् एव कथितम् ।

अद्यतः नैव प्राचीनपरम्परातः कवेर्हृदये एषा जिज्ञासा अभिलाषा सर्वदा भवति यत् यस्मिन् राष्ट्रे वयम् उत्पन्नाः तद् राष्ट्रं कथं विकसितं कथंच समृद्धं भविष्यति । राष्ट्रस्य समृद्धौ भारतीयसंस्कृतमनीषिणां पुष्पाञ्जलिःसंस्कृतस्य संस्कृतवाङ्मायस्य च सर्वेषु ग्रन्थेषुबाहुल्येन लभ्यते ।

संस्कृतवाङ्मयमतीव विशालं वर्तते । सम्पूर्णं वाङ्मयमेव “केवलाघो भवति केवलादी” [1] “सर्वे भवन्तु सुखिनः” इत्यादिविविधमहत्वपूर्णभावनाभिः, मानवीय- दर्शनतत्त्वैः समन्वितं वरीवर्त्ति । एतस्मिन् विशालकाये संस्कृतवाङ्मयेऽपि वेदानां विशिष्टं स्थानं वर्तते यतोहि वेदाः भारतस्य आत्मस्वरूपाः राष्ट्रीयग्रन्थाः वर्तन्ते । ये जातिमतसम्प्रदायलिंगवर्णविशिष्टभेदभावशून्याः मानवमात्रस्य कृतेसंस्कारप्रदा: ग्रन्थाः सन्ति । स्वयं भगवान् एव यजुर्वेदेकथयति ।

“यथेमां वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च” । प्रियो देवानांदक्षिणायैदातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु. [2] ।।

वेदेषु आध्यात्मिकविद्यास्तु स्वमूलरूपे प्राप्नुवन्ति एव । तत्रैव मनुष्याणाम् इहलौकिकभौतिकविकासस्य च अनेकानि उपयोगीनि सूत्राण्यापि उपलब्धानि भवन्ति । मानवस्य - वैयक्तिकपारिवारिक – सामाजिकोन्नतेः राष्ट्रीयविविधोपदेशाः वेदेषु यत्र तत्र सर्वत्र दृष्टिगोचराः भवन्ति। वेदेषु राष्ट्रस्य स्वरूपम्,राष्ट्ररक्षायै प्रयत्नाः, राष्टोन्नतरस्य च उपायाः राष्ट्रीयैकतायाः संवर्धनसम्बद्धप्रश्नानां विस्तारेण चर्चा वर्तते, तथा च राष्ट्रस्य सुखशान्त्यर्थं सर्वेषु व्यक्तिषु पारस्परिकंसौमनस्यं, स्थापयितुं बहुविधाः उपायाः निर्दिष्टाः सन्ति । वस्तुतस्तु इमे वेदाः राष्ट्रीयतायाः प्रतिपादितग्रन्थाः एव सन्ति । प्रत्येकं वाक्ये राष्ट्रभक्तेः माहत्म्यं द्रष्टुं शक्यते ।

अथर्ववेदीयभूमिसूक्ते भूमिः माता उक्ता वर्तते "माता भूमिः पुत्रोऽहं पृथिव्याः" [3] अर्थात् भूमिः अस्माकं माता अस्ति । वयं च तस्याः पुत्राः स्मः । भारतीयचिन्तने यस्मै सर्वाधिकमादरणीयं स्थानं दीयते तत् मातृशब्देन सम्बोध्यते । भूमेः मातृसम्बोधनेन राष्ट्रभूमिः सर्वाधिकादरणीया भवति । अपि च नमो मात्रे पृथिव्यै [4] मातृभूमेः कृते अस्माकं प्रणामः अस्तु ।

वेदेराष्ट्रे उत्पन्ना: सर्वे मनुष्याः तस्य अमृतस्वरूपिणः परमात्मनः एव पुत्राः वर्तन्ते।वेदानुसारेण कस्यचिदपि, केन प्रकारेणापि भेदभावः नैव स्वीकृतः । वेदेषु सर्वेषां समैक्यं स्वीकृतमस्ति तत्रोक्तम् –"श्रृण्वन्तु विश्वे अमृतस्य पुत्राः" [5] ।

यथा सर्वासां नदीनामाश्रयः एकमात्रंसमुद्रः भवति तथैव वेदानुसारम् आत्मतत्वदृष्ट्या सर्वेषां प्राणिनामेकमात्रम् आश्रयस्थलं स ईश्वर: अस्ति यथाहि " यत्र विश्वं भवत्येकनीडम् [6]" राष्ट्ररक्षणाय संगठनम् अतीव आवश्यकम्अस्ति अत एव

"समानीव आकूति: [7] समाना हृदयानि वः ।

समानमस्तु वो यथावः सुसहासति" । इति मन्त्रद्वारेण सर्वेषाम् अभिप्रायाः सर्वेषां हृदयानि मनांसि सर्वं समानं भवेत् इत्थं कामना कृता, येन समाजः देशश्च सुखपूर्वकः स्यात् ।

वैदिकी दृष्टिस्तु महती उदारपूर्णा खलु, एषा हि सर्वेषु वस्तुषु सर्वेषां समानमधिकारं प्रददाति अत एव आरक्षणस्य आवश्यकतां न बुद्ध्वासर्वेषामेव कृते एकैव पानीयशाला, भोजनशाला च भवेत् इति कामयते, वेदे उक्तम् च –"समानी प्रपा सहवोऽन्न भागः समाने योक्रे सह वो युनज्मि [8]" । "अथ च सग्धिश्च [9] मे सपीतिश्च मे तथा च आयुष्मतः सहभक्षाः स्याम [10]" ।

राष्ट्रीयैकतायाश्च कृते मानवोन्मुखिनः मित्रभावस्य समर्थनं कुर्वन् वेदः आदिशति "दृते दृंह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् [11]" ।"मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे मित्रस्य चक्षुषा समीक्षामहे" । सर्वेषां प्राणिनां कृते अस्माकं दृष्टिः मित्रभावोपेता भवेत् । राष्ट्रस्य विकासाय देशे अभयस्य वातावरणमपि अत्यावश्यकं भवति अतः वेदे तदर्थमपि प्रार्थना लभते –

अभयं नः करत्यन्तरिक्षमभयं द्यावापृथिवी उभे इमे ।
अभयं पश्चादभयं पुरस्तादुत्तरादधरादभयं नो अस्तु [12]।।

अन्यच्च –

अभयं मित्रादभयममित्रादभयं ज्ञातादभयं परोक्षात् ।
अभयं नक्तमभयं दिवा नः सर्वा आशा मम मित्रं भवन्तु [13]।।

ईश्वरः वेदेषु राष्ट्रस्य अखण्डतायै ईर्ष्याद्वेषादिमानवसुलभगुणान् दूरीकृत्य प्रीतिपूर्वकं मधुरवाण्याः प्रयोगस्य उपदेशं ददातियथाहि–

मा भ्राता भ्रातरंद्विक्षन् मा स्वसारमुत स्वसा
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया [14] ।।

अर्थात् भ्राता- भ्रातरं न द्विष्यात्स्वसा - स्वसारंनद्विष्यात्अपितु सुव्रताः भूत्वा पदवाण्याः प्रयोगं कुर्युः। यतोहि ऐतिह्यमेव साक्षि अत्र यत् द्रौपद्याः उक्तं कटुवचनम् "अन्धे का पुत्र अन्धा होता है" महाभारतसदृशस्य विश्वयुद्धस्य -मूल कारणमभूत् येन राष्ट्रं कुलञ्च विनष्टम् ।

मनः विचाराधीनं संस्काराधीनं वर्तते । विचारेणैव कोऽपि सुखी दुखीः अपराधी च भवति यतो हि अपराधस्य अङ्कुरः पूर्वं मनसि विचारेषु च उत्पद्यते अतः विचारेषु पवित्रता भवेत् एतदर्थम् अपि शिवसंकल्पः एवमेव वर्तते तत्र पञ्चमन्त्रा वर्तन्ते तन्मे मनः शिवसंकल्पमस्तु [15] इति यतो हि कस्यापि राष्ट्रस्य समाजस्य परिवारस्य च एकतायाः छेदः तदा भवति यदा जनेषु विपरीतविचाराः आचाराः भवन्ति ।

वेदे पशुसुरक्षार्थं पशून् पाहि इत्यादिवचनैः पशुरक्षायाः आदेशः दत्तः । यजुर्वेदे अघ्न्या अर्थात् अहन्तऽव्या इति प्रकीर्तिता तथाहि

– "इषे त्वोर्जैत्वा वायवस्थ [16] आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा"

वेदे राष्ट्रम् इति शब्दस्य प्रयोगः अनेकेषु स्थलेषु वर्तते । अथर्ववेदेउक्तम् अस्मान् राष्ट्राय अभिवर्धय अर्थात्वयम् उन्नताः, सुखसम्पन्नाः भवेम,अस्माकं मनः मननशान्तियुक्तं भवतु, बुद्धिः ज्ञानेन परिपूरणास्यात् आत्मिकबलं वर्धेत तथा च पारिवारिक्यः, सामाजिक्यः अन्यान्यशक्तयश्चवर्धेरन् येन राष्ट्रं अभ्युदययुक्तं स्यात् । राष्ट्रस्य प्रगतिः अभिवृद्धिश्च भवेत्।

"अस्मान् राष्ट्राय अभिवर्धय [17]" अत्र अस्मान् इति पदं बहुत्वद्योतकं दृश्यते । अत्र वेदेन कस्यचित् एकस्य उन्नतिः एकस्य च शक्तिविकासः नैवापेक्षितः अपि तु राष्ट्रस्य संवर्धनाय राष्ट्रवासिनां प्रतिगसीनांत्यक्ते निष्पक्षतः सर्वेषां विकासः अपेक्षितः। एषःव्यक्तिगतविकासोऽपि राष्ट्रं प्रति समर्पणभावनयोपेतो भवतु, येन राष्ट्रस्य बहुमुखी विकासः स्यात् ।

वाजस्येमं प्रसवः [18] सुषुवेऽग्रेसोमं राजानमोषधीष्वप्सु । ता अस्मभ्यं मधुमती भवन्तु "वयं राष्ट्रे जागृयाम पुरोहिताः" वयं राष्ट्रवासिनः राष्ट्रं प्रतिसदा जागुरूकाः, राष्ट्रस्य उत्थानाय नितरां प्रयतमानाः भवेम तदैव सुराज्यस्य स्वराज्यस्य च यथार्थप्रहरिणो भवितुं शक्नुमः। अनुपदम् वैदिकसाहित्ये उपदेशाः सन्निर्देशाः लभन्ते ।

वेदस्य स्पष्टः आदेशः यत् कस्यचित् अपि देशस्य वासिनःपराधीना न भवेयुः देशम् सदा स्वतन्त्रः भवेत् । वयं नित्यं प्रार्थयामहे"अदीनाः स्याम शरदः शतम् [19] " अर्थात् शतवर्षाणि अदीनाः जीवेम । अपि च "बहुपच्ये यतेमहि स्वराज्ये "अर्थात् यत् राष्ट्रं बहून् पालयति "बहूनां च सहयोगेन [20] यस्य रक्षा क्रियते तादृशाय स्वराज्याय वयं प्रयत्नशीलाः भवेम ।

कस्यापि राष्ट्रस्योन्नतिः तत्रस्थनिवासिनाम् उपरि आश्रिता भवति । वेदस्य पवित्राः भावाः जीवनं प्रकाशयन्ति अत एव वेदोद्धारकेण महर्षिदयानन्दस्वामिना वेदानाम् अध्ययनम् अध्यापनं श्रवणं श्रावणं सर्वेषां परमधर्मत्वेन सूचितम् ।

अथर्ववेदस्य द्वादशकाण्डस्यप्रारम्भिकसूक्तंपृथिवीसूक्तम् अथवाभूमिसूक्तमुच्यते तस्मिन्कस्यचित् अपि राष्ट्रस्य तस्मिन् समुत्थानायसप्तविधानि सोपानानि निर्दिष्टानि यानि नागरिकैःधारणीयानि ।

सत्यं बृहतृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु [21]।।

सत्यं - अर्थात् सत्याचारःबृहद् - अभ्युदयः विकासः उन्नतिर्वा, ऋतम् - निश्चित नियमः, उग्रता- दुर्धर्षा शक्तिः दीक्षा - दक्षता अनुशासनं वा, तपः –कर्तव्यपरायणताकठोर परिश्रमः ब्रह्म - ज्ञानं, यज्ञः - पवित्राः क्रियाः ।

यस्य देशस्य नागरिकाः सत्यं प्रति निष्ठावन्तः भवन्ति, देशस्य सर्वतोमुखिनि विकासे संलग्नाः भवन्ति । नियमानुकूलं आचरन्ति अदम्यशक्त्या सम्पन्नाः, अनुशासन प्रियाः कार्यकुशलाश्चभवन्ति कठोरश्रमं च कुर्वन्तः स्वकर्तव्यपालनंकुर्वन्ति, सुशिक्षिताक्रियाशीलाश्च भवन्ति तदा अवश्यमेवते समृद्धिशालिनो भूत्वा विश्वेऽस्मिन्लब्धप्रतिष्ठाः भवन्ति यतोहि राष्ट्रस्येमानिएतादृशानि आधारभूतानि तत्त्वानि सन्तियानि अवधार्य राष्ट्रं सुरक्षितं कर्तुं शक्नुमः ।

राष्ट्रसम्बन्धिनि यजुर्वेदेऽपि बृहत् मन्त्रः उपलभ्यते तथाहि –

"सूर्यत्वचसस्थ राष्ट्रदा [22]"

अस्य मन्त्रस्य भावः ऋषिणा एवं व्याख्यातः -

हे! स्त्रीपुरुषौ यः सूर्यवत् न्यायं विद्यां च प्रकाशयति सर्वान्आनन्दयति गोसदृशपशून् रक्षति शुभगुणैः शोभायमाना बलवन्तः सन्तः स्वतुल्यस्त्रीभिः विवहति संसारस्यच पोषणाय स्वाधीनाः भवन्ति ते एव अपरेभ्यः राज्यप्रदानाय स्वयं सेवनाय (च) समर्थाः योग्याः भवन्ति नैवान्ये ।।

इत्यनेन सर्वप्रथमम् उक्तं यत् सूर्यवत् तेजस्विनः नेतारः एव राष्ट्रस्य प्रकाशयितार: भवन्ति अद्य राष्ट्रं नेतृभिर्विहीनत्वम् उपैति । अतः राष्ट्रे तेजस्विनः नेतारः आवश्यकाः, ये हि सूर्यवत् स्वन्यायेन समस्तं राष्ट्रं प्रकाशयेयुः। विद्यासत्यव्यहारः च राष्ट्रं प्रकाशयति ।

**मन्त्रेद्वितीयेऽस्मिन् पदे मान्दास्थ**

उक्तम् - यत् प्रजायाः अनुरञ्जनं राज्यस्य कर्तव्यं भवेत्–किन्तु सम्प्रति स्वराष्ट्रे प्रजा न्यायादिदृष्ट्या सुखिनी नास्ति तथा च व्रजक्षितस्य ।

तृतीय: सन्देशः उक्तः यत् गवादिपशूनां हिंसया राष्ट्रम् अभिशप्तं भवति । ऋषिणः अनुसारं गवादिपशुविघातेन राजप्रजयोश्च विनाशः अवश्यमेव भवति । अत्रैव -चतुर्थ: विषय: उक्तः मन्त्रेपुरुषास्त्रियश्च शक्तिशालिनो भवेयुः । यदा आहारः अनुकूलो न भवति तदा शक्तिशून्यता भवति । ब्रह्मचर्यं पौष्टिकाहारश्च द्वे एव साधने याभ्यां शक्तिसम्पन्नता आगच्छति । परम् अद्य अस्माकं देशे प्रजा ब्रह्मचर्यं पौष्टिकाहारः उभाभ्यामेव वञ्चिता दृश्यते ।

मन्त्रे जनभृतः विश्वभृतः शब्दौ प्रजायाः समृद्धिं प्रति सूचयतः, समृद्धि सूचकौस्तः प्रजायाः भरणपोषणमेव प्रथमं कर्तव्यम् अस्ति । परम् अद्य अस्माकं राष्ट्रस्य कर्णधाराः नेतारः स्वार्थवशंगताः स्वस्य स्वपरिवारस्यैव भरणपोषणे लग्नाः सन्ति यस्य परिणामः प्रतिदिनं प्रवर्तमानाः घोरापचाराः दृश्यन्ते ।

अन्ते तु मन्त्रे उक्तं यत् विद्यायाः धर्मस्य च अभिवृद्धय एव राष्ट्रस्य सेवा कर्तुं शक्यते। यस्य राष्ट्रस्य स्त्री पुरुषाः विद्याधर्माभ्यां भ्रष्टाः भवन्ति सः देशः उन्नतदेशेषु कदापि न परिगण्यते न च परिगणयितुं सम्भवति ।

**अन्येऽपि स्थलेषु**

वेदे "अर्चन्ननुस्वराज्यम्[23]", "राष्ट्राय मह्यं बध्यताम्[24]"वयं तुभ्यं बलिहृता स्याम[25] इत्यादयः बहवः मन्त्राः ये राष्ट्र भक्तिं सूचयन्ति । राष्ट्रभक्तिः एव राष्ट्रस्य शक्तिः राष्ट्रस्य उन्नतिः राष्ट्रस्य सामर्थ्यं सफलता धैर्यं प्रगतिः विजयः आदर्शः चास्ति । सर्वेषां राष्ट्रवासिनाम् आनन्दस्य सन्तोषस्य, प्रसन्नतायाः आदरसत्कारस्य च हेतुः वर्तते । कर्तव्यबोधः एव राष्ट्रभक्तिः वर्तते । बाल्यकालात् एव मातृपितृभ्यां आचार्येण च उपदिश्यन्ते । वर्तन्ते खलु अनेकानि उदाहरणानि इतिहासे यत्र त्यागस्य तपस्यायाः धर्मस्य च शिक्षाम् मातरः स्वसन्तानम् उपदिशन्ति एव यथा माता जीजा बाई तपस्तेपे तदा राष्ट्रनायकः छत्रपति शिवाजी बभूव येन नाम्ना एव मुगलसेना कम्पते स्म । मातुः कुन्त्याः शिक्षयैव देशभक्ताः योद्धारः पाण्डवाः राष्ट्रस्य स्तम्भाः बभूवुः । राष्ट्रनायकस्य मर्यादापुरुषोत्तमस्य रामस्य -

अपि स्वर्णमयी लंका नेमे लक्ष्मण रोचते
जननी जन्मभूमिश्च स्वर्गादापि गरीयसि[26]।।

इदं वचनं देशभक्तेः अत्युन्नतमम् उदाहरणम् वर्ततेयत् हि सः स्वसंस्कृतितः परिवेशतः प्राप्तवान् ।

अद्य राष्ट्रे स्थितिः का अस्तिइति वयंसम्यक्तया जानीम: । अस्य कारणं वर्तते यत् अस्माकं शिक्षापद्धतिः । कस्यापि राष्टस्य उन्नतिः तत्रत्यायाः संस्कृतेः शिक्षायाश्च उपरि आधारिता भवति । यदा पर्यन्तं वयं पुन: अस्माकंसस्कृतं संस्कृतिश्च उभौ न अङ्गीकुर्मः तदा पर्यन्तं शान्तिः समृद्धिः भक्तिश्च खपुष्पायितमेव

छिन्ने मूले नैव शाख न पत्रम्[27]।।

**संदर्भ सूची**


1. केवलादी
2. यजु.26/2
3. अर्थव.12/1/12
4. यजु.9/22
5. ऋ.10/131/1
6. यजु.32/8
7. ऋ.10/191/4

8. अथर्व.3/30/6
9. यजु.18/9
10. सहभक्षा
11. यजु.36/18
12. अथर्व.19/15/5
13. अथर्व.19/15/6
14. अथर्व.3/30/3
15. यजु.34/1-5
16. यजु.1/1
17. यजु.36/24
18. यजु.9/23
19. यजु.36/24
20. स्वराज्ये
21. अथर्व.12/1/1
22. यजु.10/4
23. ऋ.म.1/80/1-15
24. बध्यतां
25. अथर्व.12/1/62
26. रामायण
27. चाणक्यणीति